# धर्मशास्त्रीय कालविवेचनम्

१- मनवः चतुर्दशसंख्यकाः - स्वायम्भुवः, स्वारोचिषः, उत्तमः, तामसः,
रैवतः, चाक्षुषः, वैवस्वतः, सावर्णिः,
दक्षसावर्णिः, ब्रह्मसावर्णिः, धर्मसावर्णिः,
रुद्रसावर्णिः, देवसावर्णिः, इन्द्रसावर्णिः।

२- अहोरात्रस्य विभागः - १- निमेषः
२- काष्ठा (अष्टादशनिमेषस्य)
३- कला (त्रिंशत्काष्ठायाः)
४- मुहूर्तः (त्रिंशत्कलायाः)
५- अहोरात्रम् (त्रिंशन्मुहूर्तस्य)
६- पक्षः - (शुक्लपक्षः, कृष्णपक्षश्च)
७- मासः - (सौरः, चान्द्रः, सावनः, नाक्षत्रः) ※

※- क- चान्द्रः - शुक्लप्रतिपदादि-दर्शान्तः कृष्णप्रतिपदादिः पूर्णिमान्तो वा चान्द्रः द्विविधात्मकः।

८- ऋतुः - (मासद्वयात्मकः, ग्रीष्मः, वर्षा, शरद्, शिशिरः, हेमन्तः, वसन्तः)

ख- सौरः - सूर्यस्य संक्रान्तिमारभ्यो-त्तरसंक्रान्तिपर्यन्तं सौरमासः।

ग- सावनः - त्रिंशद्दिनात्मकः सावनः।

घ- नाक्षत्रः - चन्द्रस्याश्विन्यादि-सप्तविंशतिनक्षत्रभोगेन नाक्षत्रः।

(तत्र ऋतुर्द्विविधः प्रोक्तः सौरचान्द्रभेदेन। सौरः मीनारम्भः चान्द्रश्च मेषारम्भः। तत्र सूर्यस्य राशिद्वयभोगात्मको वसन्तादिः षट् संज्ञकः सौरः चैत्रमारभ्य मासद्वयात्मकः वसन्तादिश्चान्द्रः।)

९- अयनम् - दक्षिणमुत्तररूपेण षण्मासात्मकं द्विविधम्।
तत्र सूर्यस्य कर्कसंक्रान्तिमारभ्य षड्राशिभोगेन दक्षिणायनम् मकरसंक्रान्तिमारभ्य राशिषड्भोगेनोत्तरायणम्।

१०- वत्सरः - चान्द्र, सौरः, सावनः, नाक्षत्रः बार्हस्पत्यश्च।
(चतुःपञ्चाशदधिकत्रिशतदिनात्मकः)

क- शुक्लप्रतिपदादिदर्शान्तः चैत्रादिद्वादशमासात्मकः। (मलमासे सति त्रयोदशमासात्मकः)

ख- मेषादिषु द्वादशराशिषु रविभुक्तेषु पञ्चषष्ट्यधिकशतत्रय-दिवसात्मकः।

ग- सावनः - षष्ठ्युत्तरशतत्रयदिनात्मकः सावनः)

घ- नाक्षत्रः - द्वादशभिर्नाक्षत्रमासैः नाक्षत्रो वत्सरः। स च चतुर्विंशत्यधिकशतत्रयदिनात्मकः।

ङ- बार्हस्पत्यः - मेषाद्यन्यतमराशौ बृहस्पतिना भुंक्ते एकषष्ठ्यधिकशतत्रयसंख्यदिनात्मकं बार्हस्पत्यः।
स च ज्योतिषशास्त्रे प्रसिद्धः।

Scanned by CamScanner

10 - सूर्यः मानुषदैवसम्बन्धिनौ दिनरात्रिकल्पौ पृथक् करोति। तयोर्मध्ये भूतानां स्वपनार्थं रात्रिः कर्मानुष्ठानार्थञ्च दिनम्।

11. मानुषाणां मासः पितृणामहोरात्रे भवतः। तत्र पक्षद्वयेन विभागे सति पितृकर्मानुष्ठानाय कृष्णपक्ष अहः स्वापार्थं शुक्लपक्षः रात्रिः।

12 - मानुषाणां वर्षः देवानां रात्रिदिने भवतः। सूर्यस्य उदगयनं देवानामहः यत्र प्रायेण दैवकर्मणामनुष्ठानम् भवति। दक्षिणायनं तु देवानां रात्रिः।

13 - चतुर्युगानि - ~~एक~~ कृत~~युगम्~~ (सत्युगम्) त्रेता, द्वापरः, कलियुगञ्च।

क - कृतयुगम् - चत्वारिवर्षसहस्रात्मकम्। तस्य तावद्वर्षशतानि सन्ध्या संध्यांशश्च भवति।

ख - त्रेतायुगम् - त्रीणिवर्षसहस्रात्मकम्। तस्य त्रीणिवर्षशतानि सन्ध्या सन्ध्यांशश्च भवति।

ग - द्वापरयुगम् - द्वे वर्षसहस्रे। तस्य द्वे वर्षशते सन्ध्या संध्यांशश्च भवति।

घ - कलियुगम् - वर्षसहस्रं कलियुगम्। तस्यैकवर्षशतं संध्या संध्यांशश्च।

14 - देवयुगम् - एतस्य मानुषचतुर्युगस्य देवयुगमेकम्।

15. मन्वन्तरम् - द्वादशवर्षसहस्रपरिमाणं सन्ध्यासन्ध्यांशसहितं मनुष्याणां चतुर्युगं देवानामेकं युगम्। तदेकसप्ततिगुणितं मन्वन्तरमिति।

Scanned by CamScanner